ISSN - 2249-5045

# SHODHA SAMIKSHA

# शोधसमीक्षा

[NATIONAL JOURNAL OF RESEARCH IN EDUCATION AND SANSKRIT]



VOL.VI. ISSUE-II JULY-DECEMBER-2016

Referred Journal

www.shodhasamiksha.com

Scanned by CamScanner

SHODHA SAMIKSHA Vol.VI ; Issue-II ; July-December, 2016 ISSN : 2249-5045

# श्रौतयज्ञानां वैज्ञानिकत्वम्

डॉ. शत्रुघ्नपाणिग्राही
वेदवेदाङ्गसङ्कायाध्यक्षः,
श्री सोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्, गुजरात।

**सारांशः**

यज्ञसम्पादनार्थमेव वेदस्याविर्भावः। यदा यज्ञे प्रदत्ताहुतिभिः अग्निशिखाः निर्मीयन्ते तदा घृतादिद्रव्याणि वायुरूपेण उपरि गच्छन्ति तदा तस्य सूक्ष्मकणाः तडित्शक्तियुक्ताः भवन्ति । आकाशे स्थितानां धूलिकणानां धूमकणानाञ्च संयोगेन या तडित्शक्तिः सञ्चिता भवति तेन मेघानां सृष्टिर्भवति । यस्मात् कारणात्सृष्टिप्रक्रिया प्रचलति । अतः विश्वस्य यत् मौलिकं तत्त्वं विद्यते येन अस्य विश्वस्य सृष्टिः स्थितिः विनाशश्च भवति तदेव यज्ञशब्देन आख्यायते । यज्ञकर्मणि देवानामावाहनं भवति । ते देवाः विश्वस्य पालने महत्त्वपूर्णभूमिकां निर्वहन्ति । वैज्ञानिकदृष्ट्या यज्ञकर्मणि अग्निना सह द्रव्याणां संयोगमेव सृष्टिरचनाकार्यमित्युच्यते । ब्रह्माण्डस्योदद्गमस्थलं यज्ञो वर्तते ।[१] यज्ञकर्म-सम्पादनेन सम्पूर्णजगत् नियन्त्रितं भवति ।[२] सम्पूर्णजगतः सत्ता अस्मिन्यज्ञे निहिता, सृष्टेः अन्ते अयं यज्ञ एव अवशिष्यत इति ब्राह्मणवचनम् ।[३]

**उपोद्घातः** — वेदो भवति यज्ञप्रधानः । श्रौतस्मार्तभेदेन यागः द्विविधः । सर्वेऽपि श्रौतयज्ञाः प्रक्रियादृष्ट्या त्रिधा विभज्यन्ते प्रकृति-विकृति-प्रकृतिविकृत्युभयात्मकभेदेन । यत्र कृत्स्नं क्रियाकलाप उच्यते सा प्रकृतिः, यत्र समग्राङ्गोपदेशः सा प्रकृतिः ।[४] यथा – दर्शपूर्णमासौ । किन्तु तस्याङ्गतया दीक्षणीयेष्टिः, उपसदिष्टिः, आतिथ्येष्टिश्चेत्यादय इष्टयः स्वक्रियाकलापान् दर्शपूर्णमासाभ्यां गृह्णन्ति । येषु यागेषु तत्तत्कर्मोपयोगी समस्तः क्रियाकलापो न पठ्यते, कर्मणः पूर्त्यर्थं च य अन्यतः क्रियाकलापान् गृह्णन्ति ते विकृतियागा उच्यन्ते । यथा - दीक्षणीयेष्टिः, उपसदिष्टिः, आतिथ्येष्टिः, मित्रविन्देष्टिः । य यागः स्वयं विकृतिरूपः सन्नप्यन्यस्य कस्यचिद् यागस्य प्रकृतिभावं प्राप्नोति, स प्रकृति-विकृतिरूपो याग इति कथ्यते । यथा - चातुर्मास्यानां वैश्वदेवपर्व । परन्तु प्रकृति-विकृतिभावे आचार्याणां लक्षणभेदैर्दृष्टिभेदैश्च भेदो द्रष्टुं शक्यते । यागे

Scanned by CamScanner

देवतायाः प्राधान्यं भवति । यागस्य लक्षणविषये श्रूयते कात्यायनश्रौतसूत्रे यथा – 'देवतोद्देश्येन द्रव्यत्यागो यागः' ।[५] अर्थात् देवान्नुदिश्य अग्नौ द्रव्यस्य संयोगः भवति चेत् यागः भवति । योगनाम एकेन सहापरस्य मिलनम् । यागोऽपि द्रव्यस्य तथा देवतायाः संयोगो भवति । अतः यागयोगयोर्भेदः नास्ति । योगस्य सिद्धः यागेनैव संभाव्यते । अस्य संसारस्य सृष्टिः यज्ञादेव भवति ।प्रजापतिः सर्वदैव यज्ञानुष्ठानमाचरितव्यमिति उपदिष्टवान् । वेदस्य यज्ञ-शब्दः यज्-धातोः निर्मितोस्ति। यज्ञस्यार्थोभवति संयोगस्थितिः। अतः यदा परमाणूनां सयोगो भवन् प्रवर्तते तदा यज्ञो भवतीत्युच्यते। परमाणूनां संयोगकार्यमेव रचनाकार्यमुच्यते। अतः यज्ञ एव सृष्टिरचनाकार्यमुच्यते। ब्रह्माण्डस्य पिण्डस्य च स्थूल-सूक्ष्मरचनां क्रमशः परिज्ञापयितुम् अग्निहोत्र-दर्शपूर्णमास-चातुमार्दिरूपाः विविधाः श्रौतयागाः प्रकल्पिताः सन्ति । विविधानां श्रौतयज्ञानां प्रकल्पना सृष्टिं विज्ञापयितुमेव कृता वर्तते । अग्निसोमात्मकं जगत् इति वैदिकसिद्धान्तं तस्य प्रमाणम् ।जगतः कारणमेव अयं यज्ञः ।अतः यज्ञः भूवनस्य नाभिरूपेण स्वीकृतः ।[६] अग्न्याधाने वेदिनिर्माणस्य या प्रक्रिया उक्ता सैव हिरण्यगर्भाख्यान्महदण्डाद्[७] यदापृथिव्यादयो लोका निस्सृतास्तदानीं पृथिवी सलिलमयी आसीत् ।[८] तस्यास्ततस्वरूपादारभ्य पृथिव्याः पृष्ठे यदाग्नेः प्रादुर्भावः समजनि तावति महति काले पृथिव्यां विविधानि परिवर्तनान्यभूवन् । अग्निसंयोगात् सलिले फेनोऽजायत । स एव मरुतां संयोगात् घनत्वं प्राप्य मृद्भावं गतः ।[९] यदा सैव मृत् सूर्यकिरणैः शुष्काऽभूत् तदा शुष्कापरूपा सृष्टिरजायत ।[१०] तदुपरिष्ठः शुष्कापभागो वायुरूपिण इन्द्रस्य योगात् पुष्करपर्णवत् लेलायमान एवासीत् ।[११] एतां शुष्कापरूपां पृथिव्या अवस्थां द्योतयितुं वेद्यां वल्मिकवपा उपकीर्यते ।[१२] सैव शुष्कापसंज्ञा मृत् सूर्यकिरणैः प्रतप्य ऊषत्वम् अलभत ।अत एव वेद्याम् ऊषरभूमेर्मृद् उपकीर्यते ।[१३] तत्पश्चात् सैव ऊषाख्या मृत् सूर्यतेजसा तप्यमाना सिकतात्वमलभत ।[१४] अनन्तरं ता एव सिकताः सूर्यतेजसाऽन्तरूष्मणा च तप्यमानाः शर्करात्वम् प्राप्तवन्तः ।[१५] तत्पश्चात् ता एव शर्करा अन्तरूष्मणा परस्परमेकीभूय अश्मत्वं गताः । सा अश्माख्या सृष्टिर्बभूव । अतः श्रूयते चयनयागे – इष्टकाभिरग्निं चिनोति ।[१६] अतः पृथिव्या वेदेश्च साम्यं स्वयं श्रुतिर्दर्शयति ।[१७]

ऋग्वेदारम्भ एवानाद्यग्निना यज्ञानुष्ठानमुक्तमस्ति ।

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्वुजम्। होतारं रत्नधातमम्।[१८] अर्थात्- आरम्भे अग्निः उपस्थित आसीत्। तथा चैतेन यज्ञकार्यं प्रारब्धम् । इदमेव यज्ञाग्नितत्त्वं सृष्टेरुत्पत्तौ स्थितौ च अतितरं कारणं भवति । सर्वे देवा अनेनैवानुप्राणिता भवन्ति ।अत एवं ऋग्वेदे श्रूयते –

अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरुत । स देवां एह वक्षति ।[१९]

Scanned by CamScanner

अर्थात् अयमग्निः पूर्वकल्पस्थितैरपि ऋषिभिरवगत आसीत् , तथा अस्य कल्पस्य ऋषिभिरप्यवगतोऽस्ति । अयञ्च सर्वेभ्यो देवेभ्यो प्राप्तोऽस्ति । अभिप्रायोऽयमस्ति यत् अयमग्निः देवतानिर्माणे स्वयोगदानं ददातीति । तस्मिन्नेव सूक्ते दृश्यते यत् हे अग्नि ! त्वं यं दोषरहितयज्ञं सर्वेषु स्थानेषु कुर्वन्नास्ते तद्यज्ञः देवान् प्रति गच्छति अर्थात् तदेव निर्माणकार्य देवा अग्रे चालयन्ति ।[२०] अनेन स्पष्टं भवति आदौ अग्निना देवाः निर्मीयन्ते । ततः इमे देवाः स्वस्वकार्य अग्रे चालयन्ति । एतदर्थं यज्ञकर्मणि देवान्नुदिश्य हविः प्रदीयते । एते अग्नादयदेवाः जगतः कल्याणं कुर्वन्ति ।श्रूयते यथा- यदङ्गदा शुषेत्वमग्ने भद्रं करिष्यसि । तवेत् तत् सत्यमङ्गिरः।।[२१]

अर्थात् अयमेवाग्निः मनुष्यस्याङ्गेषु वर्तते । तत्रायं सदा (सत्यरूपेण) विद्यमानस्वभाववान् भवन् वर्तते । मनुष्यशरीरे द्वे शक्ती कार्य कुरुतः । एका इन्द्रियेष्वस्ति । इयं सदासत्यरूपा अर्थात् निरन्तरमेव कार्यशीला न भवति । तदतिरिक्तोऽयमस्त्यग्निः, यः मानवशरीरे कार्य करोति हृदये, आन्त्रादिष्विति भावः । अयमपि द्वितीयोऽग्निः आद्यग्निः वर्तते । अयमाजीदनं कार्य करोति ।अस्य कर्म एव पञ्चावायवः इत्युच्यते ।इमे सन्ति – प्राणापानोदानव्यानसमानः । भगवता श्रीकृष्णेनापि उक्तम् –

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।<br>
प्राणपानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।।[२२]

अतः वयमनुष्ठातारः प्रतिदिनं नमस्कारं सम्पादयन्तः अग्निहोत्रादि यज्ञकर्मकर्तु तवशरणं व्रजामः ।[२३] अग्निः रचनाकर्मणि सम्पद्यमानानां यज्ञानां रक्षिता ऋततत्त्वानां (प्राकृतनियमानां) प्रकाशकोऽस्ति । अस्याभिप्रायोऽयमस्ति यत् अस्याग्नेः आश्रये एव मानवः मोक्षं प्राप्नोति ।

प्रकृतिश्च पुनः गर्भावस्थायामागता इति वेदमन्त्रे उक्तमस्ति यथा-

आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ।।[२४]

अस्याभिप्रायः अस्ति यत् प्रकृतेः शक्तिः या, परमात्मनः अग्नेः परमाणावारोहणकाले परमाणुमध्ये आसीत् सा बहिर्मुखा बभूव । सा मरुन्निर्मितिकाले पुनः मरुन्मध्य एव संतुलिता जाता आसीत्। मरुतः शक्तिः बहिर्न प्रकटिता जायते। प्रकृतिर्यदा आदिरूपा आसीत्साम्यावस्था-परमाणुः) तदापि इन्द्रस्य त्रिगुणात्मिकाशक्तिः परमाणुमध्ये संतुलिता भवन्ति तथा परमाणोः साम्यावस्थां रचयति स्म । प्रकृतेः सा अवस्था स्वधा इत्युच्यते । यदा तिस्रः शक्तयः- सत्व-रजस् –तमस् –इतिपरमाणौ संतुलिताः आसन् तदा प्रकृत्याः शक्तयपि तदन्तः प्रदेश एव परिसीमिता आसीत्। इयमासीत्प्रकृतेः प्रथमा गर्भावस्था । इदानीं परिमण्डलस्य शेषावेशोपि मरुत्यागते सति तदन्तर्गतमेव संतुलितो बभूव । इयञ्चावस्था प्रकृतेः द्वितीयागर्भावस्थेत्युच्यते।



Scanned by CamScanner

सांकेतिकरूपेणैतदिदानीमित्थं प्रकटयितुं शक्यते - द्वे परिमण्डले हाइड्रोजनस्यैकेनाक्सिजन-परिमण्डलेन सह सम्मिल्य जलस्यैको मरुत् रचयतः । (तत्त्वमोलिक्यूल)

श्रौतयागानां प्रकल्पना वैज्ञानिके आधारे वर्तते । अतः वैदिकयागानाम् आधिदैविकजगता सह साक्षात् सम्बन्धः अस्ति । अग्निहोत्रस्य अहोरात्रेण सह, दर्शपूर्णमासयोः कृष्णपक्षशुक्लपक्षाभ्यां सह, चातुर्मास्यानां त्रिभिः ऋतुभिः सह । वैदिकयागानां सम्पादनेन वायुमण्डलं शुद्धं भवति । वातावरणे प्रसृतानां विषाक्तवायुनां प्रतिकारसक्षमो यज्ञियधूमः । यः प्रतिदिनं यजते तत्र रोगाः न भवन्ति । यतोहि सन्धिसमये एव रोगा जायन्ते । सन्धिसमये एव यज्ञाः सम्पाद्यन्ते । यज्ञः रोगानां भेषजरूपः वर्तते । अतः कौषीतकिब्राह्मणे श्रूयते – भैषज्ययज्ञा वा एते यच्चातुर्मास्यानि । तस्मादृतुसन्धिषु प्रयुज्यन्ते । ऋतुसन्धिषु हि व्याधिर्जायते ।[२५]

यज्ञसम्पादनार्थमेव वेदस्याविर्भावः । यदा यज्ञे प्रदत्ताहुतिभिः अग्निशिखाः निर्मीयन्ते तदा घृतादिद्रव्याणि वायुरूपेण उपरि गच्छन्ति तदा तस्य सूक्ष्मकणाः तडित्शक्तियुक्ताः भवन्ति । आकाशे स्थितानां धुलिकणानां धूमकणानाञ्च संयोगेन या तडित्शक्तिः सञ्चिता भवति तेन मेघानां सृष्टिर्भवति । अतः मनुना उक्तम् -

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ।।[२६] इति ।

यज्ञेन अस्य विश्वस्य पालनं भवति । यज्ञेन द्युलोकः प्रसीदति, द्युलोकश्च वर्षाभिः पृथिवीं तर्पयति । यज्ञेन मेघाः निर्मीयन्ते, मेघैश्च वृष्टिर्भवति।[२७] वायुमण्डले ओजननामकस्यावरणस्य निर्माणं प्राकृतिकी क्रिया वर्तते । ओजन इति आवरणं समतापमण्डले पृथ्वितः ३० किलोमीटर उपरि निवसति । इदं रक्षाकवचं भवति पृथिव्याः । इदमावरणं सूर्यकिरणात् समागतेभ्यः Altra Violet किरणेभ्यः पृथिव्याः रक्षां करोति । परन्तु सम्प्रति शीतलभण्डाराणां वातानुकूलितयन्त्राणां प्रयोगेण च ओजनस्तरस्य ह्रासः भवति । अग्नौ घृताहुतिप्रदानेन "एलोइक" नामक अम्लस्योत्पत्तिर्जायते । एलोइक-अम्लम् ओजनस्तरस्य वृद्धिं करोति । वायुमण्डले आक्सीजन तथा कार्बन्-डाई-आक्साइडवायोः सन्तुलनं यज्ञमाध्यमेन भविष्यतीति बहुविधपरीक्षणैः वैज्ञानिकाः साधितवन्तः । वेदाः प्राकृतिकशक्तीः देवरूपाः स्वीकुर्वन्ति ।

यथा - अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध ?यर्थम् ऋग्यजुः सामलक्षणम् ।।[२८] इति ।

वैदिकवाङ्मये एतानि सवार्णि देवतात्वेन स्वीकृतानि । निरुक्तानुसारं तिस्र एव देवता भवन्ति ।[२९] अग्निःवायुःसूर्यश्चेति । अर्थात् अस्य लोकस्य देवता अग्निः, अन्तरिक्षलोकस्य

वायुः, द्युलोकस्य आदित्यः । एते त्रयो देवाः पर्यावरणसंरक्षणे महत्त्वपूर्णभूमिकां निर्वहन्ति । एतेषां देवानां शुभदृष्टिप्राप्त्यर्थमृषयः नानाकर्मभिः एतेषामाराधनां कृतवन्तः । तेषु कर्मसु यज्ञः श्रेष्ठतमकर्मरूपेण स्तूयते । यथा- "यज्ञो वै श्रेष्ठतमं कर्म"[३०] इति श्रुतेः । अतः मन्त्रद्रष्टारः ऋषयः अग्निहोत्रादययागाः मानवस्य नित्यकर्मरूपेण प्रतिपादिताः सन्ति । पर्यावरणसंरक्षणाय यज्ञस्य महत्त्वपूर्णं स्थानं विद्यते इति भगवता श्रीकृष्णेन गीतायां प्रोक्तम् –

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञकर्मसमुद्भवः ।।[३१] इति ।

"यज्ञो वै विष्णुः"[३२] इति वचनानुसारं यज्ञः साक्षात् विष्णुस्वरूपः । विष्णुशब्दस्य व्युत्पत्तिः यदि वयं पश्यामः निरुक्तग्रन्थे यत् व्याप्नोतीति विष्णुः[३३] अर्थात् यः सर्वत्र विद्यमानः सः विष्णुः । यतोहि यज्ञः भवति विष्णुस्वरूपः तर्हि विष्णुसदृशः यज्ञः अपि सर्वत्रैव विद्यमानः ।

निष्कर्षरूपेण इदं वक्तुं शक्यते यत् सर्वेषु कर्मसु यज्ञः भवति श्रेष्ठः । सोमयागेन देवाः जायन्ते सौत्रामण्यां मानवा इति वैदिकसिद्धान्तः । यज्ञ एव सृष्टिरूत्पत्तेः मूलकारणम् । पर्यावरणसंरक्षणे यज्ञः महत्वपूर्णभूमिकां निर्वहति । यज्ञेन विचारशुद्धिः, सद्भाववृद्धिः, रोगनिवृत्तिः, लोकोपकारः, मोक्षप्राप्तिश्च जायते । अतः आधुनिककालेऽपि अस्य सम्पादनमवश्यमेव कुर्यात् । इति शम् ?

## – टिप्पणी –

१) यज्ञः बभूव भुवनस्य गर्भः । तैत्तरीयब्राह्मणम् – २/४/७/५
२) यज्ञो वै विश्वरूपाणि यज्ञमेवैतेन सम्भरति । जै. ब्रा. -१/७४
३) यज्ञ एव अन्ततः प्रतितिष्ठति । तैत्तरीयब्राह्मणम् – १/८/१/२
४) वेदार्थपारिजात, पृष्ठ-२०९६
५) कात्यायनश्रौतसूत्रम् -१/२
६) अयं यज्ञो भुवनस्य नाभिः । शुक्लयजुर्वेदः - २०/८
७) हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । ऋग्वेदः-१०/१२१/१
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । मनुस्मृतिः – १/९
८) आपो ह आ इदमग्रे सलिलमेवासीत् – शतपथब्राह्मणम् – ११/६/१/६
९) स (फेन) यदोपन्यते मृदेव भवति । शतपथब्राह्मणम् – ६/१/३/३
सोऽग्निमारुतसंयोगाद् घनत्वमुपपद्यते । माहा. शान्ति.-१८२/१५
१०) ऋग्वेदः १०/११९/९

Scanned by CamScanner

SHODH...

११) सा हेयं पृथिव्यलेलायद् यथा पुष्करपर्णम् । शतपथब्राह्मणम् -२/१/१/८

१२) यद् वल्मीकवपामुपकीर्यार्ग्निमाधत्ते । मै. सं. -१/६/३

१३) यदूषानुपकीर्यार्ग्निमाधत्ते । मै. सं. – १/६/३

१४) यत्सिकतामुपकीर्यार्ग्निमाधत्ते । मै. सं. – १/६/३

१५) यच्छर्करा उपकीर्यार्ग्निमाधत्ते । मै. सं. – १/६/३

१६) तैत्तरियसंहिता- ५/६/९/३

१७) इयं वेदिः परो अन्तः पृथिव्याः । शुक्लयजुर्वेदः - २३/६२

१८) ऋग्वेदः १/१/१

१९) ऋग्वेदः १/१/२

२०) अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद् देवेषु गच्छति । ऋग्वेदः १/१/४

२१) ऋग्वेदः १/१/६

२२) श्रीमद्भगवद ?गीता – १५/१४

२३) ऋग्वेदः १/१/७

२४) ऋग्वेदः १/६/४

२५) कौषीतकिब्राह्मण-५/१

२६) मनुस्मृतिः - ३/६६

२७) ऋग्वेदः १/१६४/५१

२८) मनुस्मृतिः - १/२३

२९) निरुक्तम् – ७/२

३०) शतपथब्राह्मणम् – १/३/१५

३१) श्रीमद्भगवद्गीता – ३/१४

३२) शतपथब्राह्मणम् – १/१/२/१३

३३) निरुक्तम् – १२/२

## अनुशीलितग्रन्थसूची


१. शुक्लयजुर्वेद संहिता- उवट्ट-महीधरभाष्यसंवलित तत्वबोधिनि हिन्दीव्याख्योपेता, संकलकः पणशीकरोपाह्वो वासुदेवशर्मा, चौखम्बा विद्याभवन, वाराणसी , १९९२.

२. शतपथब्राह्मणम् , डॉ. अल्बेर्तेन वेबेरेण शोधितम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी ।

३. ऋग्वेदसंहिता- श्रीमत्सायणाचार्यविरचितभाष्यसमेता,वैदिकसंशोधनमण्डल, पुने,१९०५

४. निरुक्तम् – छज्जुराम शास्त्री, मेहरचन्द्र लछमनदास पब्लिकेशन्स, नईदिल्ली, १९९३


Scanned by CamScanner

५. मनुस्मृतिः - सम्पादक पं. गंगानाथ झा , परिमल पब्लिकेशन्स, २००४
६. अथर्ववेद – सायणभाष्यसहित, चौखम्बा विद्याभवन, वाराणसी
७. ऐतरेयब्राह्मणम् – सुखप्रदाख्यवृत्ति सहितम्, नागपब्लिसर्स,१९९१
८. तैत्तरीयब्राह्मणम् – मूलमात्र, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
९. कौषीतकिब्राह्मण- डॉ. मङ्गलदेव शास्त्री, चौखम्बासुरभारती प्रकाशन, वाराणसी
१०. तैत्तरीयसंहिता- सायणाचार्यविरचितभाष्यसमेता,वैदिकसंशोधनमण्डल,पुने
११. मैत्रायणिसंहिता - चौखम्बासुरभारती प्रकाशन,गोपालमन्दिरलेन, वाराणसी
१२. माहाभारतम् – मूलमात्र, गीताप्रेस, गोरखपुर, उत्तरप्रदेश
१३. कात्यायनश्रौतसूत्रम् – डॉ. शम्भुकुमार झा,जगदीशसंस्कृतपुस्तकालय, जयपुर
१४. श्रीमद्भगवद ?गीता - मूलमात्र, गीताप्रेस, गोरखपुर, उत्तरप्रदेश
१५. श्रौतयज्ञमीमांसा – युधिष्ठिर मीमांसक, श्रीमती सावित्रीदेवी बगडिया ट्रस्ट, कोलकाता।

———— o ————

Scanned by CamScanner